# ॥ श्री दत्तात्रेय कवचम् ॥

श्रीपादः पातु मे पादौ ऊरू सिद्धासनस्थितः ।
पाया द्दिगंबरो गुह्यं नृहरिः पातु मे कटिम् ॥
नाभिं पातु जगत्सष्टो दरं पातु दरोदरः ।
कृपालुं पातु हृदयं षड्भुजः पातु मे भुजौ ॥
स्कक्कुंडीशूलडमरु शंखचक्रधरः करान् ।
पातु कंठं कंबुकंठं सुमुखं पातु मे मुखम् ॥
जिह्वां मे वेदवा क्पातु नेत्रं मे पातु दिव्यदृक् ।
नासिकां पातु गंधात्मां पातु पुण्यश्रवाः श्रुती ॥
ललाटं पातु हंसात्मा शिरः पातु जटाधरः ।
कर्मेंद्रियाणि पात्वीशः पातु ज्ञानेंद्रियाण्यजः ॥
सर्वांतरोंतःकरणं प्राणा न्मे पातु योगिराट् ।
उपरिष्टा दधस्ताच्च पृष्ठतः पार्श्वतोग्रतः ॥
अंतर्बहिश्च मां नित्यं नानारूपधरोवतु ।
वर्जितं कवचेनाव्यात् स्थानं मे दिव्यदर्शनः ॥
राजतः शत्रुतो हिंस्रात् दुष्प्रयोगादितो घतः ।
आधिव्याधिभयार्तिभ्यो दत्तात्रेयस्सदावतु ॥
धनधान्यगृहक्षेत्र स्त्रीपुत्रपशुकिंकरान् ।
ज्ञातींश्च पातुमे नित्य मनसूयानन्दवर्धनः ॥
बालन्मत्तपिशाचाभो दुविट् संधिषु पातु माम् ।
भूतभौतिकमृत्युभ्यो हरिः पातु दिगंबरः ॥
य एत द्दत्त कवचं सन्नह्यात् भक्तिभावितः ॥
सर्वानर्थविनिर्मुक्तो ग्रहपीडाविवर्जितः ॥
भूतप्रेतपिशाचाद्यैर् देवैरप्यपराजितः ।
भुक्त्यात्र दिव्यान् भागन् स देहान्ते तत्पदं व्रजेत् ।७
इति श्री दत्तत्रेय कवचम्

Please send corrections to sanskrit@cheerful.com
Last updated April 1, 2002